SAMVAD E-JOURNAL
ISSN (Online) :2583-8334
(International Peer-Reviewed Refereed Journal) Volume 3, Issue-5, Oct-Nov-Dec : 2025
Published by Rangmati Publication, jamnagar https://www.rangmatipublication.com

# पञ्चमहाकाव्येषु प्रकृतिसौन्दर्यस्य संक्षिप्तवर्णनम्

*खूंटी गीताबेन लख्मणभाई,*

*मार्गदर्शिका - डॉ. ऊर्वशीबहेन सी. पटेल,*

*सारांशः*

*भारतीयसाहित्यपरम्परायां पञ्चमहाकाव्यानि – रघुवंशः, कुमारसम्भवः, किरातार्जुनीयम्, नैषधीयचरितम् शिशुपालवधः – अत्यन्तं महत्वपूर्णं स्थानं प्राप्तवन्ति। एषु ग्रन्थेषु न केवलं नायकनायिकानां चरितानि प्रतिपादितानि, अपि तु प्रकृतेः अद्वितीयं सौन्दर्यम् अपि रमणीयतया निरूपितम्।*

*कालिदासः, भारविः, माघः, श्रीहर्षः च कवयः पर्वतानां, वनों, नदीनां, पुष्पाणां, पक्षिणां, ऋतूनाम् इत्यादीनां चित्रणेन स्वकाव्येषु रसगौरवं संवर्धितवन्तः। पञ्चमहाकाव्येषु ऋतुवर्णनम्, जलस्य महत्त्वं, पशु-पक्षिणां माधुर्यम्, आकाशस्य विशालताम्, अग्नेः तेजः इत्यादयः विविधानि रूपाणि प्रकृतेः स्फुटं प्रकटितानि।*

*अत्र प्रकृतिः केवलं भूमिकामात्रं न, अपि तु मानवजीवनस्य सहचरी च, यत्र कवयः तस्यां भावाभिव्यक्तेः साधनम् अपश्यन्। एवं दर्शनम् एतानि काव्यानि न केवलं साहित्यिकदृष्ट्या समृद्धानि करोति, अपि तु तेषां सांस्कृतिकं दार्शनिकं च महत्त्वम् अपि प्रकाशयति।*

*तस्मात् पञ्चमहाकाव्येषु प्रकृतिसौन्दर्यस्य विवेचनं अस्मान् प्राचीनानां कवीनां प्रकृतिप्रेम, पर्यावरणसचेतना, सांस्कृतिकैकात्मता च स्पष्टयति।*

## प्रस्तावना

भारतीयसाहित्यपरम्परायां महाकाव्य इति प्राकारः कविशक्तेः चरमोत्कर्षं द्योतयति। महाकाव्येषु राजोपाख्यानानि, देवचरितानि, नायकनायिकानां प्रेमकथाः, युद्धवर्णनानि, उत्सवाः च विविधरूपेण प्रकटन्ते। तथापि एषु महाकाव्येषु केवलं ऐतिहासिककथानक वा वीरगाथा न दृश्यते, अपि तु समग्रजीवनस्य दर्शनं लभ्यते।

विशेषतः पञ्चमहाकाव्यानि कालिदासकृतौ रघुवंशः तथा कुमारसम्भवः, भारविकृतं किरातार्जुनीयम्, माघस्य शिशुपालवधः, श्रीहर्षकृतं नैषधीयचरितम् एतानि भारतीयमहाकाव्यानां शिरोमणयः सन्ति। एतेषु काव्येषु कवीनां कल्पनाशक्तिः, रसप्रकटनम्, अलङ्कारव्यवहारः, वर्णनवैचित्र्यम्, प्रकृतिसौन्दर्यस्य निरुपणम् इत्यादयः काव्यकला-वैभवस्य श्रेष्ठानि प्रमाणानि भवन्ति ।

कविभिः अत्र न केवलं नायकनायिकाभ्यां सह काव्यकथा गुञ्जति, किन्तु प्रकृतिः अपि सहचरी रूपेण प्रविशति। हिमालयस्य दिव्यगौरवम्, गङ्गायाः पावित्र्यम्, वन्यजीवनस्य च चैतन्यम् -एतेषां वर्णनानि अस्मान् तावत् आल्हादयन्ति यावत् तानि अध्यात्मसम्बद्धं सन्देशं अपि ददाति।

अतः पञ्चमहाकाव्येषु प्रकृतिसौन्दर्य केवलं शृङ्गारवर्धक वा दृश्यपरिच्छेदकम् न, अपि तु मानवनैतिकजीवनस्य, आध्यात्मिकचेतनायाः च अविभाज्यः अङ्गः इति स्पष्टं भवति ।

पञ्चसु महाकाव्येषु प्रकृतेः सौन्दर्यात्मकं वर्णनं अतीव सुन्दररूपेण कृतम् अस्ति। एषु महाकाव्येषु प्रकृतिः जीवितस्य च नयनानन्दस्वरूपः दर्शितः अस्ति। कविभिः प्रकृतेः विविधानि तत्त्वानि यथा पर्वतः,


*खूंटी गीताबेन लख्मणभाई, संस्कृतविभाग, भाषासाहित्यभवनम्, गुजरात विश्वविद्यालयः, अहेमदाबाद,३८०००९, गुजरातम्*
*मार्गदर्शिका डॉ. ऊर्वशीबहेन सी. पटेल,सी. यु. शाह.. महाविद्यालयः अहेमदाबाद्*

नदी, वृक्षाः, वनस्पतयः च अतीव सुन्दररूपेण वर्णितानि। एतत् वर्णनं अस्मान् प्रकृतेः सुन्दरत्वस्य विविधतायाः अनुभूतिं ददाति ।

**मुख्यशब्दाः** (मुख्य सब्दा):पञ्चमहाकाव्य, प्रकृतिः सौन्दर्यम्, ऋतुवर्णनम्, नद्रयः, पर्वताः, वनानि।

**कुमारसम्भवम्**

कालिदासेन लिखितेऽस्मिन् महाकाव्ये हिमालयः पर्वताः, गङ्गा सरितः, सरोवराणि, समुद्रः च इत्यादिकं प्रकृतेः अतीव सजीवम् वर्णनं कृतम्। तत्र हिमालयस्य अतीव रमणीयं वर्णनं द्रष्टुं शक्यते। सः हिमालयः देवतानां निवासस्थानं, अनेक औषधीनां भण्डारः च रूपेण निरूपितः अस्ति।

असंख्यरत्नानि सन्ति चेदपि, हिमालयस्य हिममण्डितं सौन्दर्यं न नश्यति। यतः एकः दोषः अपि गुणसमूहे चन्द्रकिरणेषु कलङ्कवत् अदृश्यः भवति।

**अनन्तरत्नप्रभवस्य यस्य हिमं नसौभाग्यविलोपि जातम् ।**
**एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ॥ ३ ॥'**

अस्मिन् अवतरणे कविः हिमालयस्य महत्वं तस्य च अद्भुतं सौन्दर्यं वर्णयति। सः वदति यत् हिमालये असंख्यानि रत्नानि मूल्यवानाश्मनः च सन्ति, तथापि तस्य हिमाच्छन्नं सौन्दर्य कदापि न हीयते। यथा चन्द्रे लघुकलङ्ङ्कः सति अपि तस्य शोभा न हीयते, एवं हिमालयस्य अपि सौन्दर्य अखण्ड भवति।

कालिदासेन हिमालयस्य वर्णनं कृत्वा तस्य भव्यतां तस्य च रमणीयतां प्रकटितवान्। सः हिमालयं केवलं पर्वत इति न, किन्तु पवित्रं दिव्यं च स्थानम् इति निरूपितवान्।

**रघुवंशम्**

रघुवंशे हिमालय-विन्ध्य-पर्यायान् अन्ये च पर्वताः सजीवेन वर्णिताः। तथा वनान्तरेषु पुष्पाणि, दूर्वा-तृणानि, कलरवमादाय पक्षिणः, मधुरसंगीतयुक्ताः जलपाताः, गड्ङ्गा-सरयू-प्रभृतयः नद्यः च मनोहररूपेण प्रकृतेः चित्रीकरणं कृतम्।

कालिदासेन विरचितेऽस्मिन् महाकाव्ये मुरला-नदी तथा तदुपकण्ठप्रदेशस्य वर्णनं कृतम्। सरयू-नदी अपि तत्र पवित्रता-समृद्धः प्रतीकरूपेण निरूपिता।

**अभ्यभूयत वाहानां चरतां गात्रशिञ्जितैः ।**
**वर्मभिः पवनोद्धृतराजतालीवनध्वनिः ॥ ५५ ॥**

मुरला-नद्याः पवनेन उद्धृताः केतकिपुष्पराजयः रघोः सैन्येषु पतित्वा विनाप्रयासेन सुगन्धितचूर्णरूपेण जाताः, यत् तैः सहसा एव सैनिकाः सुगन्धिनः अभवन्। एषा नदी केरलप्रदेशे विद्यते।

एतत् एकं सुन्दरं काव्यात्मकं वर्णन यत् कालिदासस्य कल्पनाशक्तिं भाषायाः च गाढं अधिकारं प्रकाशयति ।

**किरातार्जुनीयम्**

भारविणा विरचिते अस्मिन् महाकाव्ये प्रकृतेः अतीव गाम्भीर्यमयम्, सजीवम्, प्रभावशालि च वर्णनं कृतम्। विशेषतः यदा अर्जुनः तपः कर्तुं गच्छति तदा पर्वतीयपरिसरस्य अत्यन्तं सुन्दरं चित्रणं दृश्यते।

तत्र इन्द्रकीलपर्वतस्य वर्णनं कृतम्। इन्द्रकीलः घनवनसमावृतः, नानाविधानां वन्यजीवानां च निवासस्थानरूपेण निरूपितः अस्ति।

**जलदजालघनैरसिताश्मनामुपहतप्रचयेह मरीचिभिः ।**
**भवति दीप्तिरदीपितकन्दरा तिमिरसंवलितेव विवस्वतः ।। ४८ ।।**

शिलासु सूर्योदयकिरणाः न पतन्तिः तेन गुहासु अन्धकारः व्याप्यते। इव हि सूर्यप्रकाशः अपि मेघानां कारणेन तमोभूतः ।

इन्द्रकीलस्य गुहाः अत्यन्तं रमणीयाः। अयं पर्वतः इन्द्रस्य प्रियतमः। सुवर्णकिन्नरकान्तिः वातेन प्रेरितलतानां मध्ये प्रविश्य विद्युदाकृतिं ददाति । अत्र चन्दनवृक्षः मदोन्मत्तगजगण्डसंस्पर्शन सर्पशून्यः जातः। मरकत-मणेश् तीक्ष्णप्रभया अयं पर्वतः एव सूर्यकिरणान् अपि म्लानान् करोति ।

## शिशुपालवधम्

माधेन विरचितेऽस्मिन् महाकाव्ये प्रकृतेः अत्यन्तं मनोहरं, सजीव, काव्यमयं च वर्णनं कृतम्। तत्र ऋतूनां वर्णनं, विशेषतः रैवतकपर्वतस्य चित्रणं दृश्यते। रैवतकः रमणीयं सुन्दरं च स्थानं रूपेण निरूपितः।

श्रीकृष्णस्य सारथिः दारुकः रैवतकस्य मनोरमं वर्णनं करोति। अस्मिन् प्रसङ्गे कविः माघः तेन कारणेन समीक्षकैः 'घण्टामाघः' इति बिरुदं प्रापः।

सूर्यस्य उदयकाले चन्द्रस्य चास्तकाले च रैवतकः पर्वतः, स्वयोः पार्श्वयोः लम्बमानाभ्यां सूर्यचन्द्राभ्यां शोभते, यथा कश्चित् गजः स्वपार्श्वयोः लम्बमानाभ्यां घण्टाभ्यां शोभते ।

रैवतकपर्वतस्य घण्टाविभूषितगजोपमं साम्यं दत्त्वा सहृदयसमालोचकाः माघस्य अस्य कल्पनायाः प्रति अतीव प्रसन्ना अभवन्, अतः तस्मै बिरुदं दत्तवन्तः ।

"**उदयति विततोर्ध्वरश्मिरज्जा-वहिमरुचो हिमाधाम्नि याति चारुतम् ।**
**वहति गिरिस्यं विलम्बिघण्टाद्रय-परिवारितवारणेन्द्रलीलाम् ||** "२५

रैवतकपर्वतस्य वर्णनं कुर्वन् कविः वदति यत् तस्य श्रृङ्गेषु अनेकानि मूल्यवन्ति रत्नानि आसीत्। तत्र नानापुष्पेषु विकसभ्यः भ्रमराः गुंजनं कुर्वन्तः आसन्। हरिणाः स्वच्छन्दतया विचरन्तः दृष्टाः। पद्मयुतसरोवरैः, मुक्तकुसुमैः, तमाल-ताडवृक्षैः युक्तः सः पर्वतः अतीव सुन्दररूपेण निरूपितः

## नैषधीयचरितम्

श्रीहर्षेण विरचितेऽस्मिन् महाकाव्ये प्रकृतेः सजीवं चित्रणं कृतम्। तत्र क्रीडासरोवराणां, उपवनानां च आभासः आभ्यन्तरेण वर्णितः। नर्मदा नदीस्य अपि वर्णनं कृतम्। नर्मदा नदी पवित्रा मोक्षदायिनी च रूपेण निरूपिता।

अस्मिन् महाकाव्ये दमयन्त्याः सौन्दर्य वर्णयतः कवेः नर्मदानदीसम्बन्धः अपि निर्दिष्टः ।

"**कि नर्मदाया मम सेयमस्या दृश्याऽभितो बाहुलता मृणाली ।**

**कुचो कि मृ-तस्थतुरन्तरीप स्मरोष्मशुष्यन्तर बाल्यवारः ।।" "**

नैषधीयचरितमहाकाव्ये नायिका दमयन्त्याः बाह्यसौन्दर्य वर्णयन् महाकविः श्रीहर्षः नर्मदानद्याः उल्लेखं करोति। सः तस्याः उभयतटेषु दृश्यमानाः पद्मलताः, नर्मदाजलमध्ये प्रकटमानाः द्वीपकान् च निर्दिशति ।

## निष्कर्षः

एषु पञ्चसु महाकाव्येषु प्रकृतेः वर्णन केवलं बाह्यरूपस्य नास्ति, अपि तु तत्र प्रकृतेः आन्तरिकसौन्दर्य तस्य च आध्यात्मिकमहत्त्वं अपि प्रकाशितम्। कविभिः प्रकृतिः मानवजीवनसहितं संयोज्य तस्य महत्त्वं प्रतिपादितम् ।

प्रकृतिसौन्दर्यं केवलं पञ्चमहाकाव्येषु शोभायाः साधनं न, अपि तु मानवानां हृदयस्पर्शि प्रेरणास्रोतः इति दृश्यते। कालिदासादयः कवयः ऋतु, नदी, पर्वत, पुष्प, वन, चन्द्रादीनां माध्यमेन न केवलं काव्यस्य अलङ्कारं विरचयन्ति, किन्तु सांस्कृतिकं, दार्शनिकं च सन्देशं जनयन्ति ।

कवयः प्रकृतिसौन्दर्यस्य वर्णने मानवानां भावनाभावं, जीवनपद्धतिं, समाजस्य संस्कारान् च प्रतिबिम्बयन्ति। एतेषु महाकाव्येषु मानवप्रकृत्योः अखण्डसम्बन्धः स्पष्टरूपेण व्यक्तः अस्ति ।

अत एव पञ्चमहाकाव्येषु प्रकृतिसौन्दर्यस्य संक्षिप्तवर्णनं न केवलं काव्यसौन्दर्यस्य आस्वादनाय, अपि तु संस्कृतिसंरक्षणाय, पर्यावरण-जागरूकताय च महत्त्वपूर्ण योगदानं करोति।

सन्दर्भग्रन्थसूची

१)कुमार, १/३

२)कीरात् १/४८

३) रघु ४/५५

४)शिशु ४/२५

५)नैषधीय ७/७३

सन्दर्भग्रन्थसूची


૧.કુમાર સંભવ મહાકાવ્ય પ્રકાશ ટીકા શ્રી પ્રધુમન પાંડેય, (ચોખ્ખા વિધાભવન વારાણસી)

૨.રઘુવંશ મહાકાવ્ય ડો. ગોતમ પટેલ (અહમદાબાદ)પ્રથમ આવુંતિ

૩.કીરાતાર્જુનીયમ મહાકાવ્ય મલ્લીનાથ ની ઘંટાપથ ટીકા (ચોખ્ખા વિધ્યાભવન વારાણસી )

૪ નૈષધિયચરિતમ મહાકાવ્ય ની ચન્દ્રકલા ટીકા આચાર્ય શ્રી શેષરાજ શર્મા (ચોખ્ખા વિધાભવન વારાણસી )

5.શિશુપાલ વધ મહાકાવ્ય ની શ્રી મલ્લીનાથ ની સર્વાકક્ષા ટીકા તથા મણીપ્રભા (ચોખ્ખા વિધા ભવન વારાણસી )